as a कर्मप्रवचनीय). 1 After, behind, along after (पश्चात्); सर्वे नारदमनु उपविशन्ति V. 5; प्रमदामनु संस्थितः शुचा नृपतिः सन् R. 8. 72; तं गच्छन्त्यनु ये विपत्तिषु सदा ते तत्प्रतिष्ठाशया Mu. 1. 14; असौ कुमारस्तमजोऽनुजातः R. 6. 78; रत्या च साशङ्कमनुप्रयातः Ku. 3. 23; क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् R. 2. 24; अनुविष्णु = विष्णोः पश्चात् P. II. 4. 18. Sk.; तदनु कथयेर्माधवीयामवस्थाम् Māl. 9. 26 afterwards. –2 Along, alongside, by the side of, lengthwise यस्यचायामः P. II. 1. 16 जलानि सा तीरनिखातयूपा वहत्ययोध्यामनु राजधानीम् R. 13. 61; सोऽश्वमेधशतेनेष्ट्वा यमुनामनु वीर्यवान्। त्रिशताश्वान् सरस्वत्यां गङ्गामनु चतुःशतान् Mb.; अनुगङ्गं वाराणसी=गङ्गामन्वायतम् (गङ्गादैर्घ्यसदृशदैर्घ्योपलक्षिता) situated alongside the Gaṅgā P. II. 1. 16 Sk.; आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् Me. 21; गिरिरिव अनुतटपुष्पितकर्णिकारयष्टिः V. 3. 3 along the sides or slopes. –3 After, in consequence of, being indicated by; जपमनु प्रावर्षत् P. II 3. 8 Sk. (हेतुभूतजपोपलक्षितं वर्षणम्); so वृक्षमनु विद्योतते विद्युत्. –4 With, along with (सहार्थे); connected with; नदीमन्वसिता सेना P. I. 4. 85 Sk. (नद्या सह सम्बद्धा) उमास्तनोद्भेदमनु प्रवृद्धः Ku. 7. 24 along with, contemporaneously; Śi. 8. 56; दिवसोऽनुमित्रमगमद्विलयम् 9. 17. –5 Inferior or subordinate to, (मित्रलाभमनु लाभसम्पदः Ki. 13. 52 inferior, lower in value or importance; अनु हरिं सुराः = हरेर्हीनाः हीने); P. I. 4. 86 Sk. –6 In a particular relation or state (इत्थंभूताख्याने प्रकारविशेषनिरूपणे); भक्तो विष्णुमनु Sk. (विष्णोरित्थंभूतः, भक्तिविशेषयुक्तः) an ardent devotee of Viṣṇu; यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु Rām. favourably inclined or devoted to. –7 Having a part or share, participation; or one that claims a share of (भागे); भागोऽस्यास्ति इति भागस्वामी; लक्ष्मीर्हरिमनु (हरेर्भागः) Sk., हरिस्वामिकभागवतीत्यर्थः. –8 Repetition, in a distributive sense, mostly in comp. (वीप्सार्थे, विषयतायाम्); अनुदिवसम् day by day, every day; अनुक्षणम् every moment; °वेलम् every time, frequently; वृक्षम् वृक्षमनु सिञ्चति Sk. waters tree after tree, *i. e.* every tree (यावद्वृक्षव्यापकः सेकः). –9 Towards, in the direction of, near, to, at (अनुर्यत्समया P. II. 1. 15); अनुवनमशनिर्गतः Sk.; °नदि Śi. 7. 24 near the river; प्रजिघाय कान्तमनु मुग्धतरः 9. 55 to (प्रति); on or in, with the force of the locative; यदेतदस्यानुतटं विभाति 4. 39, 7. 1; तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णाम् (जह्नोः कन्याम्) Me. 52. –10 In orderly succession, according to; अनुक्रमम् in regular order; अनुज्येष्ठम् = ज्येष्ठस्यानुपूर्व्येण in order of seniority; °पूर्वम्; अनुरूपम् = रूपस्य योग्यम् Sk. –11 Corresponding with, like, in imitation of; सर्वे मामनु ते प्रियाविरहजां त्वं तु व्यथां मानुभूः V. 4. 47; so अनुगर्ज् to roar after or in imitation of. –12 Following, conformable to (अनुगत); तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् R. 4. 12. (अनुगतोऽर्थो यस्य). –13 With regard to, towards, in respect of; अर्घ्यदानमनु चोदितो वचः Śi. 14, 53; साधुदेवदत्तो मातरमनु; –14 On account of, by reason of (with abl.); समस्तो बत लोकोऽयं भजते कारणादनु। त्वं तु निष्कारणादेव प्रीयसे वरवर्णिनि॥ Rām. As a separable adverb अनु is used only in the Vedas and means after, afterwards, later on, now, at this time, again, once more, then, and further. (The senses of अनु as given by G. M. are:— अनु वेदाध्ययनानुष्ठानसामीप्यपश्चाद्भावानुबन्धनसाम्याभिमुख्यहीनविसर्गलक्षणेषु; *e. g.* वेदे अनुवाकः; अनुष्ठाने अनुतिष्ठति; सामीप्ये अनुमेघं वर्षति; पश्चाद्भावे तदनु; अनुबन्धने अनुशेते; साम्ये अनुकरोति; आभिमुख्ये मातरमनुधावति वत्सः; हीने अनुहरिं सुराः; विसर्गे अनुजानीते; लक्षणे अनुवनमशनिर्गतः.) The senses of अनु may be thus expressed in verse:— आयामेऽपरभावे च (पश्चादर्थे) वीप्सायां सन्निधौ तथा। इत्थंभूते लक्षणे च भागसादृश्ययोरपि॥ योग्यतायां तथा हीने तृतीयार्थे ह्यनुक्रमे। अर्थेष्वेतेषु बहुशो ह्यनुशब्दः प्रयुज्यते॥.

**अनुः** Ved. 1 A man. –2 N. of a son of Yayāti. –3 An ancient tribe in India; अनुत्वाहिघ्ने अध देव देवा Rv. 6. 18. 14.

**अनुक** *a.* [अनु–कन् P. V. 2. 74, अनुकामयते इति अनुकः कमिता Sk.] 1 Greedy; desirous. –2 Libidinous, lustful (as a lover). –3 Sloping.

**अनुकच्छम्** Along or near the marshy ground; आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् (Me. 21).

**अनुकथ्** 10 P. To relate after (some one else), mention subsequently.

**अनुकथनम्** Subsequent mention; आदेशः कथनम्, अन्वादेशोऽनुकथनम् Kāśi. on P. II. 4. 32. –2 Relation, narration; discourse, conversation.

**अनुकनीयस्** *a.* The next youngest. P. VI. 2. 189.

**अनुकम्प्** 1 A. To take pity or compassion on, sympathize with, pity (with acc.); किमुज्झितानजीवितां वराकीं नानुकम्पसे Māl. 10; कथं ब्राह्मणी मामनुकम्पते Mk. 3; कम्पसे नानुकम्पसे 4. 8; with loc. also; सौहृदेन तथा प्रेम्णा सदा मय्यनुकम्पसे Mb. –*Caus.* To pity &c.; शफरीं प्रथमा वृष्टिरिवान्वकम्पयत् Ku. 4. 39.

**अनुकम्पक** *a.* Pitying, taking compassion on, sympathizing with.

**अनुकम्पन** *a.* One who pities, kindhearted, compassionate. **–नम्** Compassion, pity, tenderness, sympathy.

**अनुकम्पा** [कम्प्-अङ्] Compassion, commiseration, pity; with gen.; तेषामेवानुकम्पार्थम् Bg. 10. 11; or with loc.; भक्त्या गुरौ मय्यनुकम्पया च R. 2. 63; or in comp.; भूतानुकम्पा तव चेत् R. 2. 48; अनुकम्पायां कन् P. V. 3. 76.

**अनुकम्पित** *p. p.* Pitied; °आत्मन् having a compassionate spirit.

**अनुकम्पिन्** *a.* Pitying (in comp.); sympathizing with.

**अनुकम्प्य** *pot. p.* Pitiable, worthy of sympathy; किं तत्र येनासि ममानुकम्प्या R. 14. 74; दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम् Ku. 3. 76. **–म्प्यः** 1 A courier, express messenger. –2 An ascetic.

**अनुकल्पः** An alternative, a second alternative, a make-shift, अभावे हि श्रुतस्य अनुकल्पः प्रतिनिधिः। ŚB. on MS. 6. 3. 35.

**अनुकाङ्क्षा** Desire, wish.